श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे

# ॥ श्रीरामद्वादशनामस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरामद्वादशनामस्तोत्रम् ॥

अस्य श्रीरामद्वादशनामस्तोत्रमहामन्त्रस्य।
निटिलाक्षो भगवान् ऋषिः।
अनुष्टुप् छन्दः।
श्रीरामचन्द्रो देवता।
श्रीरामचन्द्रप्रसादप्रीत्यर्थे जपे विनियोगः॥

प्रथमं श्रीकर नित्यं ततो दशरथात्मजम्।
तृतीयं रामचन्द्रं च चतुर्थं रावणान्तकम्॥ **1** ॥

पञ्चमं लोकपूज्यं च षष्ठं श्रीजानकीप्रियम्।
सप्तमं वासुदेवं च रामचन्द्रं तथाष्टमम्॥ **2** ॥

ततो दूर्वादलश्यामं दशमं लक्ष्मणाग्रजम्।
एकादशं च गोविन्दं द्वादशं सेतुबन्धनम्॥ **3** ॥

द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः।
दारिद्र्यदोषनिर्मुक्तो धनधान्यसमृद्धिमान्॥ **4** ॥

सर्वसंपत्प्रदं श्रेष्ठं सर्वकार्यवशीकरम्।
दिव्यदेहमवाप्नोति दीर्घमायुष्यवर्धनम्॥ **5** ॥

ग्रहदोषविनाशं च सर्वकार्यफलप्रदम्।
अरण्ये देवसङ्ग्रामे महाभयनिवारणम्॥ **6** ॥

अर्धरात्रं जपेत् स्थित्वा सर्वारिष्टनिवारणम्।
इहजन्मसुखी भूत्वा यायाद्विष्णोः परं पदम्॥ 7॥

॥ इति श्रीरामद्वादशनामस्तोत्रं समाप्तम्॥